# शांति पाठ

## SAANTIPAATH
(peace invocation)

ॐ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः।
नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्ष्यं ब्रह्मासि। त्वामेव पत्यक्ष्यं ब्रह्म वदिष्यामि।
ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मां। अवतु
वक्तारम्। ॐ शांतिः शांतिः शांातिः।

Om sam no Mitrah sam Varunah, sam no bhavatvaryamaa, sam na Indro Brihaspatihi, sam no Vishnururukramah. namo Brahmane, namaste Vayo, tvameva pratyaksham Brahmaasi, tvaameva pratyaksham Brahma vadishyaami, ritam vadishyaami, satyam vadishyaami, tanmam-avatu, tad-vaktaaram-avatu, avatu maam, avatu vaktaaram, om santhi santih santih

ॐ सहनाववतु। सहनौभुनक्तु। सहवीर्यं करवावहै। तेजस्विनावधीतमस्तु
मा विद्विषावहै। ॐ शांतिः शांतिः शांतिः

Om sahanaavavatu, saha nau bhunaktu, saha-veeryam karavaavahai, Tejaswinaavadheetamastu maa vidvishaavahai, Om santih shantih shantihi

ॐ भद्रं कर्णेभिः श्रुणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवाँ संस्तनूभिः। व्यषेम देव
हितंयदायुः।स्वस्ति न इंद्रो वृध्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः।
स्वस्ति नो बृहस्पतिर्दधातु। ॐ शांतिः शांतिः शांतिः।

bhadram karnebhihi shrinuyamadevah, bhadram pashyemakshabhir yajatrah, sthirairangaisthushtuvagam sastunibhihi vyashemadevahitam yadayuh, swasti na indro vriddhvashravah, swastinah poosha vishvavedah, swatinastarkshyo arishtanemihi,swatino brihaspatirdadhatu. Om shanti santihi shantihi.
(from upanishads)

# श्रीगिणेशः

# GANESH

अगजानन पद्मार्कम्   गजाननमहर्निशं
अनेकदं तं भक्तानां   एकदन्तमुपास्महे

agaja-anana padma-arkam      gaja-ananam-ahar-nisam
aneka-dam tam bhaktaanaam    eka-dantam-upaasmahe

शुक्लांबरधरं विष्णुं     शशिवर्णं चतुर्भुजं
प्रसन्नवदनं ध्यायेत     सर्वविघ्नोपशांतये

shukla-ambara-dharam vishnum    shashi-varnam chatur-bhujam
prasanna-vadanam dhyayet     sarva-vignopasanthaye

# श्रीसरस्वति

# SARASWATI

या कुंदें दुतुषारहार धवला या शुभ्रवस्त्रावृता
या वीणावरदंडमंडितकरा या स्वेतपद्मासना
या ब्रह्मा-च्युत-शंकर पभृतिभिर्देवै सदावंदिता
सा मां पातु सरस्वती भगवती निश्शेष जाडयापहा

ya kundendu-tushaara-haara-dhavalaa  yaa subhra-vastraavritaa
yaa veenaa-vara-danda-mandita-karaa   yaa sweta-padmasanaa
yaa brahma-achyuta-shankara-prabhritibhir devaissadaa-vanditaa
saa maam-paatu saraswati bhagavati nisshesha jaadyaapahaa

सरस्वती नमस्तुभ्यं     वरदे कामरूपिणी
विद्यारंभं करिष्यामि      सिद्धिर्भवतु मे सदा

saraswatee namastubhyam      varade kaama-roopini
vidya-arambham karishyaami     siddhirbhavatu me sadaa

# श्रीहनुमान
# HANUMAN

मनोजवं मारुततुल्यवेगं    जितेंद्रियं बुद्धिमतांवरिष्टं
वातात्मजं वानरयूथमुख्यं    श्रीरामदूतं शिरसानमामि

Manojavam maaruta-tulya-vegam    jitendriyam buddhi-mataam-varishtam
vaata-atmajam vaanara-yoodha-mukhyam   sreeraama-dootam sirasaa-namaami

अंजनानंदनं वीरं    जानकीशोकनाशनं
कपीशमक्षहंतारं    वंदेलंकाभयंकरं

Anjanaa-nandanam veeram    jaanakee-shoka-naashanam
Kapeesam-aksha-hantaaram    vande lankaa-bhayankaram

# देवि
# GODDESS (DEVI)
**(Lakshmi, Saraswati and Durga)**

माणिकयवीणामुपलालयंतीं    मदालसां मंजुलवाग्विलासां
महेंद्र-नील-दयुतिकोमलागीं    मातंगकन्यां मनसा स्मरामि

maanikya-veenaam-upalaalayanteem   madaalasaam manjula-vaagvilaasaam
mahendra-neela-dyuti-komala-angeem  maatanga-kanyaam manasaa smaraami

मातस्समस्तजगतां मधुकैटभारे  वक्षोविहारिणि मनोहर दिव्यमूर्ते
श्रीस्वामिनि-श्रितजन-प्रिय-दानशीले    श्रीवेंकटेश दयिते तवसुप्रभातं

maatas-samasta-jagataam madhu-kaitabhaare
vaksho-vihaarini manohara-divyamoorthe
sree-swaamini-sritajana-priya-daana-seele
sree-venkatesa dayite tava su-prabhaatam

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरगधामेश्वरीं
दासीभूत समस्तदेववनितां लोकैकदीपाकुरां
श्रीमन्मंदकटाक्षलब्ध विभवब्रहेद्र गंगाधरां
त्वां त्रैलोकय कुटुंबिनीं सरसिजां वन्दे मुकुंदप्रियां

lakshmeem, ksheera-samudra-raja-tanayaam sreeranga-dhaameswareem
daseebhoota samasta-deva-vanitaam lokaika-deepankuraam
sreeman-manda-kataaksha-labdha-vibhava-brahmendra-gangaadharaam
tvaam trailokya-kutumbineem sarasijaam vande mukunda-priyaam

## श्रीरामः
## SHRI RAMA

श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघु कुलान्वय रत्न दीपं
आजानुबाहुमरविन्ददलायताक्षं रामं निशाचर विनाशकरं नमामि

sree raaghavam dasharatha-atmajam-aprameyam
seeta-patim raghu-kula-anvaya-ratna-deepam
aajaanu-baahum aravinda-dalaayatha-aksham
raamam, nishaa-chara vinaasa-karam namaami

## श्रीविष्णुः
## SHRI-VISHNU

ध्यायेतसत्यं गुणातीतं गुणत्रयसमन्वितं
लोकनाथं त्रिलोकेशं कौस्तुभाऽभरणं हरिं

dhyayet satyam gunaateetam guna-traya-samanvitam
loka-naatham trilokesam kaustubha-abharanam harim

शांताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्नं शुभांगं
लक्ष्मीकांतं कमलनयनं योगिहृध्यानगम्यं वंदे विष्णुं भवभयहरं सर्वलौकैकनाथं

shanta-akaaram bhujaga-shayanam padma-naabham suresham
viswa-adhaaram gagana-sadrisam megha-varnam shubha-angam
lakshmi-kantam kamala-nayanam yogi-hridhyana-gamyam
vande-vishnum bahva-bhaya-haram sarva-lokaika-natham

# श्रीशिवः
# SHRI SIVA

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नग भूषणं शशिधरं वन्दे मुकुन्दपियं
वन्दे सूर्य-शशाँक- वह्नि नयनं वन्दे पशूनां पतिं
वन्दे भक्त जनाश्रयं च वरदं वन्दे शिवं शकरं

vande shambhum-umapatim sura-gurum vande jagat-kaaranam
vande pannaga-bhooshanam sashi-dharam vande mukundapriyam
vande surya-shashaanka-vahni-nayanam vande pashoonaam-patim
vande bahkta-jana-asrayam cha varadam vande shivam shankaram

# श्रीकृष्णः
# SHRI KRISHNA

कस्तूरी तिलकं ललाटफलके वक्षस्थले कौस्तुभं
नासांग्रे नवमौकितंक करतले वेणुं करे कंकणं
सर्वांगेहरिचंदनं च कलयं कंठेचमुक्तावलींम
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणी

kastooree-tilakam lalaata-phalake vaksha-sthale kausthubham
naasa-agre nava-mouktikam kara-tale venum kare-kankanam
sarvaange hari-chandanam cha kalayam kanthe-cha-muktavaleem
gopa-stree parivestitho vijayayate gopaala-choodamani

## निर्वाण षट्कम्
## nirvaaṇa ṣaṭkaṃ

चिदानंद रूपः शिवोऽहं शिवोऽहं चिदानंद रूपः शिवोऽहं शिवोऽहं

cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ

मनो-बुध्यहंकार चित्तानि नाहम्१ॐ न च श्रोत्र-जिह्वे नचघ्राण-नेत्रे
न च व्योम भूमिर न तेजो न वायुः चिदानंद रूपः शिवोऽहं शिवोऽहं
चिदानंद रूपः शिवोऽहं शिवोऽह १

mano-budhyahaṁkāra cittāni nāham
naca śrotra-jihve na ca ghrāṇa-netre
na ca vyoma bhūmir na tejo na vāyuḥ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ 1

न च प्राण संज्ञो न वै पंच वायुः न वा सप्त धातुर्नवा पंच कोशाः
न वाकपाणि-पादं न चोपस्थपायुः चिदानंद रूपः शिवोऽहं शिवोऽहं
चिदानंद रूपः शिवोऽहं शिवोऽह २

na ca prāṇa saṁjño na vai paṁca vāyuḥ
na vā sapta dhāturnavā paṁca kośāḥ
na vākapāṇi-pādaṁ na copasthapāyuḥ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ 2

न मे द्वेषरागौ न मे लोभ मोहौ मदोनैव मे नैव मात्सर्य भावः
न धर्मो न चार्थो न कामो न मोक्षः चिदानंद रूपः शिवोऽहं शिवोऽहं
चिदानंद रूपः शिवोऽहं शिवोऽहं ३

na me dveṣaraagau na me lobha mohau
madonaiva me naiva mātsarya bhāvaḥ
na dharmo na cārdho na kamo na mokṣaḥ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ 3

न पुण्यं न पापं न सौख्यं न दुःखं न मंत्रो न तीर्थं न वेदा न यज्ञाः
अहं भोजनं नैव भोज्यं न भोक्त चिदानंद रूपः शिवोऽहं शिवोऽहं
चिदानंद रूपः शिवोऽहं शिवोऽहं ४

na puṇyaṁ na pāpaṁ na saukhyaṁ na duḥkhaṁ
na maṁtro na tīthaṁ na vedā na yajñāḥ
ahaṁ bhojanaṁ naiva bhojyaṁ na bhokta
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ 4

न मे मृत्यु शंका न मे जाति भेदः पिता नैव मे नैव माता न जन्म
न बंधुर्न मित्रं गुरुर्नै व शिष्यः चिदानंद रूपः शिवोऽहं शिवोऽहं
चिदानंद रूपः शिवोऽहं शिवोऽहं ५

na me mṛtyu śaṁkā na me jāti bhedaḥ
pitā naiva me naiva mātā na janma
na baṁdhurna mitraṁ gururnaiva śiṣyaḥ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ 5

अहं निर्विकल्पो निराकार रूपः विभुर्व्याप्य सर्वत्र सर्वेंद्रियाणाम्
सदा मे समत्वं न मुक्तिर्नबन्धः चिदानंद रूपः शिवोऽहं शिवोऽहं
चिदानंद रूपः शिवोऽहं शिवोऽह ६

ahaṁ nirvikalpo nirākāra rūpaḥ
vibhuivyaapya sarvatra sarvendriyāṇām̥
sadā me samatvaṁ na muktirnabandhaḥ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ
cidānaṁda rūpaḥ śivo'haṁ śivo'haṁ 6

शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहं
śivo'haṁ śivo'haṁ śivo'haṁ śivo'haṁ

(आदि शंकराचार्यः)
(by adi shankaracharya)

# प्रातः स्मरण

# pratah smarana

(morning prayers)

करताग्रे वसते लक्ष्मि करमध्ये सरस्वति
करमूलेतु गोविंदः प्रभाते कर दर्शनं १
karāgre vasate lakṣmi karamadhye sarasvati
karamūletu goviṁdaḥ prabhaate kara darśanaṁ 1

समुद्र वसने देवि पर्वत स्तनमंडले
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे २
samudra vasane devi parvata stanamaṁḍale
viṣṇupatna namastubhyaṁ pādasparśaṁ kṣamasva me 2

ब्रह्मामुरारिस्त्रिपुरांतकारि भानुःशशिभूमिसुतोबुधश्च
गुरुश्च शुक्रः शनि राहु केतवः कुर्वंतु सर्वे मम सुप्रभातम् ३
brahmāmurāri-stri-purāṁtakāri bhānuśśaśibhūmisutobudhaśca
guruśca śukraḥ śani rāhu ketavaḥ kurvaṁtau sarvae mama suprabhātam
3

सनत्कुमारः सनकः सनंदनः सनातनोऽप्यासुरिपिंगलौच
सप्त स्वराः सप्त रसातलानि कुर्वंतु सर्वे मम सुप्रभातम् ४
sanatkumāraḥ sanakaḥ sanaṁdanaḥ sanātano'pyaasuripiṁgalauca
sapta svarāḥ sapta rsātalaani kurvaṁtau sarvae mama suprabhātam 4

सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त
भूरादिकृत्वा भुवनानि सप्त कुर्वंतु सर्वे मम सुप्रभातम् ५
saptārṇavāḥ sapta kulācalāśca saptaṣayo dvīpavanaani sapta
bhūrādikṛtvā bhuvanāni sapta kurvaṁtau sarvae mama suprabhātam 5

पृथ्वी सगंधा सरसास्तथापः स्पर्शीच वायुर्ज्वलनंच तेजः
नभःसशब्दं महता सहैव कुर्वंतु सर्वे मम सुप्रभातं ६
pṛthvī sagaṁdhā sarasāstathāpaḥ sparśīca vāyurjvalanaṁca tejaḥ
nabhassaśabdaṁ mahatā sahaiva kurvaṁtu sarvae mama suprabhātaṁ 6

महेंद्रो मलयः सह्यो देवतात्मा हिमालयः
ध्येयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा ७
maheṁdro malayaḥ sahyo devatātmā himālayaḥ
dhyeyo raivatako vindhyo giraścārāvalistathā 7

गंगा सिंधुश्च कावेरी यमुनाच सरस्वती
रेवा महानदी गोद ब्रह्मपुत्रा पुनातु माम् ८
gaṁgā siṁdhuśca kāverī yamunāca sarasvatī
revā mahānadī goda brahmaputrā punātu mām 8

अयोध्या मथुरा माया काशी कांची अवंतिका
पुरीद्वारावतीचैव सप्तैता मोक्षदायकाः ९
ayodhyā mathurā māyā kāśī kāṁcī avaṁtikā
purīdvārāvatīcaiva saptaitā mokṣadāyakaḥ 9

प्रयागं पाटलीपुत्रं विजयानगरं पुरीं
इंद्रप्रस्थं गयांचैव प्रत्यूषे प्रत्यहं स्मरेत् १०
prayāgaṁ pāṭlīputraṁ vijayānagariṁ purīṁ
iṁdraprasthaṁ gayāṁcaiva pratyūṣe pratyahaṁ smaret 10

अरुंधत्यनसूयाच सावित्री जानकी सती
तेजस्विनी च पांचालि वंदनीया निरंतर ११
aruṁdhatyanasūyāca sāvatrī jānakī satī
tejasvanī ca pāṁcāli vaṁdanīyā nirṁtaraṁ 11

लक्ष्मीरहल्या चन्नम्मा मीरादुर्गावती तथा
कण्णगीच महासाध्वी शारदाच निवेदिता १२
lakṣmīrahalyā cannammā mīrādurgaavatī tathā
kaṇṇagīca mahāsaadhvī śāradāca naveditā 12

वैनं पृथुं हैहवमर्जुनं च शाकुंतलेयं भरतं नलं च
रामंच यो वै स्मरति प्रभाते तस्यार्थलाभो विजयश्च हस्ते १३
vainaṁ pṛthuṁ haihavamarjunaṁ ca śākuṁtaleyaṁ bharataṁ nalaṁ ca
rāmaṁca yo vai smarati prabhāte tasyārthalābho vajayaśca haste 13

ॐ

दध्यङ मनुर्भृगुरसौ हरिपूर्वचन्द्रो भीष्मार्जुन ध्रुव वशिष्ट शुकादयश्च
प्रह्लाद नारद भगीरथ विश्वकर्म वाल्मीकयोऽत्र चिरचिन्त्य शुभाभिधानाः १४

dadhyaṅ manurbhṛgurasau haripūrvacandro
bhiṣmārjuna dhṛva vaśiṣṭa śukādayaśca
prahlāda nārada bhagīratha vśvakarma
vālmikayo'tra cracntya śubhābhdhānāḥ 14

अश्वत्थाम बलिर्व्यासो हनूमांश्च विभीषणः
कृपः परशुरामश्च सप्तैते चिरजीविनः १५

aśvatthāma balrvyaaso hanūmāṁśca vibhīṣaṇaḥ
kṛpaḥ paraśurāmaśca saptaite cirajīvanaḥ 15

सप्तैतान् संस्मरेनित्यं मार्कंडेयमथाष्टकम्
जीवेद्वर्ष शतं साग्रमपमृत्युविवर्जित १६

saptaitān saṁsmarenityaṁ mārkaṁḍeyamathāṣṭakam
jīvedvarṣa śataṁ sāgram-apamṛtyuvivarjita 16

पुण्यश्लोको नलोराजा पुण्यश्लोको युधिष्टिरः
पुण्यश्लोको विदेहश्च पुण्यश्लोको जनार्दनः १७

puṇyaśloko nalorājā puṇyaśloko yudhiṣṭiraḥ
puṇyaśloko videhaśca puṇyaśloko janārdanaḥ 17

बुद्धो जिनेन्द्रो गोरक्ष; शंकरश्च पतंजलिः
रामानुजोऽथचैतन्यः कबीरो गुरुनानकः १८

buddho jinendro gorakṣa; śaṁkaraśca pataṁjaliḥ
rāmānujo'thacaitanyaḥ kabīro gurunānakaḥ 18

ज्ञानेश्वरस्तुकारामः समर्थो मध्ववल्लभौ
नरसिस्तुलसदिासः कम्बः साधुकुलोत्तमाः १९

rjñāneśvarastukārāmaḥ samartho madhvavallabhau
narasastulasidāsaḥ kambaḥ sādhukulottamāḥ 19

नायन्माराल्वाराश्च तिरुवल्लुवरस्तथा
वितरंतु सदैवैते दैवीं मे गुणसापदम् २०

nāyanmārālvārāśca tiruvalluvarastathā
vitaraṁtu sadaivaite daivīṁ me guṇasāpadam 20

अगस्तयः कम्बु कौण्डिन्यौ  राजेन्द्रश्चोलभूषणः
सर्वे दिग्जयिनः ख्याताः   शैलेन्द्रो बाप्परावलः   २१
agastayaḥ kambu kauṇḍinyau   rājendraścolabhūṣaṇaḥ
sarve digjayanaḥ khyātāḥ   śailendro bāpparaavalaḥ   21

चाणक्यश्चन्द्रगुप्तश्च   विक्रमःशालिवाहनः
अशोकः पुष्यमित्रश्च  खारवेलः सुनीतिमान्   २२
cāṇakyaścandraguptaśca   vikramaśśālivāhanaḥ
aśokaḥ puṣyamitraśca   khāravelaḥ sunītimān   22

हूणजेता यशोधर्मा समुद्रो गुप्तवंशजः
श्रीकृष्णदेवरायश्च प्रदाता हर्षवर्धनः   २३
hūṇajetā yaśodharmaa samudro guptavamśajaḥ
śrīkṛṣṇadevarāyaśca   pradātā harṣavardhanaḥ   23

साधुः  शंकर देवश्च   तथा सायणमाधवौ
प्रतापः शिवराजश्च   गोविन्दो बसवेश्वरः   २४
sādhuḥ   śaṁkar devaśca tathā sāyaṇamaadhavau
pratāpaḥ śivarājaśca   govindo basaveśvaraḥ   24

रामकृष्णो दयानन्दो   रवींद्रो राममोहनः
रामतीर्थोऽरविनदश्च   विवेकानन्द उद्यशाः   २५
rāmakṛṣṇo dayānando   raviindro rāmamohanaḥ
rāmatīrtho'ravanadaśca   vivekānanda udyaśāḥ   25

तिलको रमणश्चैव   सुधीर्नारायणो गुरुः
महामना मालवीयो  महात्मा गांधिरेवच   २६
tilako ramaṇaścaiva   sudhīrnaarāyaṇo guruḥ
mahāmanā mālavīyo   mahaatmā gāndhirevaca   26

अनुक्ताये भक्ता हरिचरणसंसक्त हृदयाः
अविता वीरा अधिसमरमुध्वस्त रिपवाह
महत्मानाःसंतो  भरतभुवि ये संति च परे
नमस्तेभ्यो भूयाद  युष सि सकलेभ्यः पतिदिन   २७

anuktāye bhaktā haricaraṇasaṁsakta haṛdayāḥ
avitā vīrā adhisamaramudhvasta ripavāh
mahatmānāssaṁto  bharatabhuva ye saṁti ca pare
namastebhyo bhūyād  yuṣasi sakalebhyaḥ pratidina   27

रत्नाकराधौत पादाम	हिमालयकिरीटिनीम
बह्मराजर्षि रत्नाढ्याम	वन्दे भारतमातरम	२८
ratnākaradhauta pādāma hamālayakarīṭanīma
bahmarājaṣa ratnāḍhyāma vande bhāratamātarama 28

पातःस्मरणमेतद्यो विदित्वादरतः पठेत
स सम्यग्धर्मनिष्टस्यात	संस्मृताखंड भारतः	२९
pātassmaraṇametadyo vadatvādarataḥ paṭheta
sa samyagdhamanaṣṭasyāta saṁsmṛtākhaṁḍa bhārataḥ 29

# आरति
# ārati

ॐ जय जगदीश हरे    स्वामि  जय जगदीश हरे
भक्त जनों के संकट    क्षण मे दूर करें    ॐ जय जगदीश हरे
om jaya jagadīśa hare    svāmi  jaya jagadīśa hare
bhakta janoṁ ke saṁkaṭa    kṣaṇa me dūra kare    om jaya jagadīśa hare

जो ध्यावे फलपावे    दुःखबिन से मनका
सुखसंपति घर आवे    कष्ट मिटे तनका    ॐ जय जगदीश हरे
jo dhyāve phalapāve    duḥkhabina se manakā
sukhaasaṁpati ghara āve    kaṣṭa miṭe tanakā    om jaya jagadīśa hare

मात-पिता तुम मेरे    शरण कहूँ मैं  किसकी
तुम बिन और न दूज    आस करुँ मैं जिसकी    ॐ जय जगदीश हरे
mātapitā tuma mere    śaraṇa kahū̃ mai  kisakī
tuma bina aura na dūja  āsa karŭ mai jisakī    om jaya jagadīśa hare

तुम पूरण परमात्म    तुम अंतर्यामि
पारब्रह्म परमेश्वर    तुम सबके स्वामि    ॐ जय जगदीश हरे
tuma pūraṇa paramātma    tuma aṁtaryaami
paarabrahma parameśvara    tuma sabake svāmi    om jaya jagadīśa hare

तुम करुणाके सागर    तुम पालन कर्ता
मैं मुर्ख खलकामि    कृपाकरो भर्ता    ॐ जय जगदीश हरे
tuma karuṇāke sāgara    tuma pālana kartaa
mai murkha khalakāmi    kṛpākaro bhartaa    om jaya jagadīśa hare

तुम हो एक अगोचर    सब के प्राण पति
किसविध मिलूँ दयामय  तुम को मैं कुमति    ॐ जय जगदीश हरे
tuma ho ek agocara    saba ke prāṇa pati
kisavidha milū̃ dayāmaya  tuma ko mai kumati    om jaya jagadīśa hare

दीनबंधु दुःख हर्ता    तुम रक्षक मेरे
अपने हाथ उठाओ    द्वार पडा तेरे    ॐ जय जगदीश हरे
dīnabaṁdhu duḥkha hartaa    tuma rakṣaka mere
apane hāth uṭhāo    dvāra paḍā tere    om jaya jagadīśa hare

विषय विकार मिटाओ   पाप हरो देवा
श्रद्धा भक्ति बढाओ   संतन की सेवा   ॐ जय जगदीश हरे
viṣaya vikāra miṭāo   pāpa harao devā
śraddhā bhakti baḍhāo   saṁtana kī sevā   om jaya jagadīśa hare

तन मन धन सब तेरा   सब कुछ है तेरा
तेरा तुझको अर्पण   क्या लागे मेरा   ॐ जय जगदीश हरे
tana mana dhana saba terā   saba kucha hai terā
terā tujhako arpaṇa   kyā lāge merā   om jaya jagadīśa hare

--------

त्वमेव माताच पिता त्वमेव   त्वमेव बन्धुश्च सखा त्वमेव
त्वमेव विद्या द्रविणं त्वमेव   त्वमेव सर्वं मम देव देव
tvameva mātāca pitā tvameva   tvameva bandhuśca sakhā tvameva
tvameva vidyā draviṇaṁ tvameva   tvameva sarvaṁ mama deva deva

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मनावा प्रकृति स्वभावाः
करोमि यद्यत्सकलम परस्मै   नारायणायेति समर्पयामि
kāyena vācā manasendriyairva buddhyātmanāvā prakṛtir svabhāvāḥ
karomi yadyat-sakalam parasmai   nārāyaṇāyeti samarpayāmi

ॐ असतोमा सद्गमय   तमसोमा ज्योतिर्गमय
मृत्योर्मा अमृतं गमय   ॐ शांतिः शांतिः शांतिः
om asatomā sadgamaya   tamasomā jyotirgamaya
mṛtyormaa amṛtaṁ gamaya   om śāṁtiḥ śāṁtiḥ śāṁtiḥ

ॐ पूर्णमदः  पूर्णमिदम्   पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय   पूर्णमेवावशिष्यते   ॐ शांतिः शांतिः शांतिः
om pūrṇamadaḥ  pūrṇamidam   pūrṇaatpūrṇamudacyate
pūrṇasya pūrṇamādāya   pūrṇamevāvaśiṣyate   om śāṁtiḥ śāṁtiḥ śāṁtiḥ

ॐ सर्वे भवंतु सुखिनः   सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु   मा कश्चिद् दुःखभाकभवेत्   ॐ शांतिः शांतिः शांतिः
om sarve bhavaṁtu sukhinaḥ   sarve santu nirāmayāḥ
sarve bhadrāṇi paśyantu  mā kaścid duḥkha-bhāk-bhavet
om śāṁtiḥ śāṁtiḥ śāṁtiḥ

*ॐ तत् सत्   om tat sat*

-- ० --